जुलाई २०१८ (वै.२०७५)
(आषाढ कृष्ण तृतीया तः श्रावण कृष्ण द्वितीया पर्यन्तम्)
ISSN: 2347-1565
मूल्यम् : २५ रूप्यकाणि

संस्कृत-चन्द्रिका

मासिकी संस्कृत-बालपत्रिका

वर्षम्- ५ अङ्कः :- १२

सम्पादकः
डॉ० जीतराम भट्टः
सचिवः

''संस्कृत मंजरी''

एक साहित्यिक त्रैमासिक पत्रिका

एवं

समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति

तथा

सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ-साथ नवोदित प्रतिभाओं की सशक्त लेखनी की संयुक्त प्रस्तुति

''संस्कृत मंजरी''

(आई.एस.एस.एन.-२२७८ -८३६०)

संस्कृत भाषा और साहित्य के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित एक ऐसी सम्पूर्ण साहित्यिक पत्रिका जो सहज मानवीय संवेदनाओं, शोध निबन्धों तथा उदात्त जीवन-मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है ।

मूल्य : - एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु.१००/- मात्र

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

''संस्कृत मंजरी''

के स्थायी अध्येता बनें ।

आज ही अपना वार्षिक सदस्यता शुल्क नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट द्वारा दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें । शुल्क मल्टी सिटी चैक द्वारा स्वीकार्य होगा।

पत्र व्यवहार का पता--

सचिव/सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार

प्लाट सं. ५, झण्डेवालान, करोलबाग, नई दिल्ली-११०००५

दूरभाष सं.-०११-२३६३५५९२, २३६८१८३५

ISSN : 2347-1565

मूल्यम् २५/- रूप्यकाणि

संस्कृत-चन्द्रिका

'मासिकी संस्कृत-बाल-पत्रिका'

वर्षम्-५ अङ्कः-१२

जुलाई-२०१८ वै.२०७५

(आषाढ-कृष्ण-तृतीयातः
श्रावण-कृष्ण-तृतीयाः पर्यन्तम्)

सम्पादकः
डॉ० जीतराम भट्टः

सचिवः

सहायकसम्पादकः
प्रद्युम्नचन्द्रः

पत्रिका-परामर्शकाः
डॉ० आशुतोषदयालमाथुरः
डॉ० पंकजा घई
डॉ० पूर्वा भारद्वाजः
डॉ० धनञ्जयमणि त्रिपाठी

- अनुक्रमणिका -

क्र.सं.			पृ.सं.
१.	सम्पादकीयम्		
२.	राष्ट्रम्	-डॉ. क्षेमचन्दः	१
३.	बुद्धिमान् गोपालः	-डॉ. हर्षदेवमाधवः	३
४.	घटिके घटिके	-डॉ. वेणीमाधव शास्त्री 'जोशी'	५
५.	पुच्छमैत्री	-म.वि. कोल्हटकरः	६
६.	अहो मातृभूमिरहोजन्मभूमे	-मेवाराम कटारा 'पङ्कः'	८
७.	दयावान् राक्षसः	-डॉ. हर्षदेवमाधवः	९
८.	पञ्चवटी	-डॉ. रामकिशोरमिश्रः	११
९.	किमपि विसृष्टम्	-म.वि.कोल्हटकरः	१२
१०.	श्रीराधामाधवलीलास्तोत्रम्	-डॉ. कैलाशनाथ द्विवेदीः	१४
११.	श्रमः फलति सर्वत्र	-डॉ. क्षेमचन्दः	१६
१२.	किं भाति मह्यम्?	-डॉ. कीर्तिबल्लभः शक्टा	१९
१३.	जलरक्षा हि जीवनरक्षा	-डॉ. हेमचन्द्रबेलवालः ''हिमांशुः''	२०

दिल्ली संस्कृत अकादमी

(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)

DELHI SANSKRIT ACADEMY

(GOVT. OF N.C.T., DELHI)

प्रकाशकः

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-११०००५

दूरभाषः - ०११-२३६३५५९२,२३६३७७९८

ISSN : 2347-1565

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

सदस्यताशुल्कम्

©	प्रति-अङ्कम्	:	25 रूप्यकाणि, $2.5
©	वार्षिकम्	:	250 रूप्यकाणि, $25.00

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः (मनिआर्डर) अथवा सी०टी०सी० चैक माध्यमेन

(दिल्लीसंस्कृतअकादमीपक्षे)

Mode of payment:

Demand Draft, Money order or by CTC Cheque

(In favour of "Delhi Sanskrit Academy")

E-mail Id : delhisanskritacademy@gmail.com

Website : www.sanskritacademy.delhi.gov.in

सम्पादकीयम्

संस्कृतचन्द्रिकेयं बालानां कृतेऽस्ति सत्यमेतत्। किन्तु न केवलं वयसा बाला अपितु संस्कृतज्ञानेऽपि ये बालसदृशाः सन्ति तेषां कृतेऽप्यास्ति। विद्यालयेषु संस्कृतशिक्षकाः सन्तोऽपि केचन संस्कृतं न जानन्ति यदि चेत् जानन्ति तर्हि संस्कृतमाध्यमेन शिक्षणायाभ्यासो नास्ति। तेषां कृतेऽपीयं बाल चन्द्रिकेवास्ति। लोके ये संस्कृतप्रेमिणः संस्कृतपठनोत्सुकाः सन्ति तेभ्योऽपि पत्रिकेयं बहुलाभप्रदाऽस्ति। भाषाभ्यासेनैव सिद्धा भवति। श्रवण-भाषण-पठन-लेखनक्रमे संस्कृतस्याभ्यासाय संस्कृतचन्द्रिका सर्वेषामेव कृते सहायिकाऽस्ति।

यदि चेद् वयं कामयामहे यदस्माकं प्रवृत्तिः संस्कृते स्याद् भाषारूपे च संस्कृतस्य प्रयोगः स्यात्तर्ह्यस्माकं गृहेषु विद्यालय-पुस्तकालयेषु च संस्कृतपत्रिकाणामुपस्थितिर्भवेत्। तैत्तिरीयोपनिषदः शिक्षावल्ल्यामेकादशानुवाके प्रोक्तञ्च यत् 'स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्।' वस्तुतः शिक्षणाय प्रशिक्षणाय वा स्वाध्यायः परमावश्यकोऽस्ति स्वाध्यायनन्तरमेव पठने लेखने प्रवचने भाषणे च सिद्धिर्मिलति। संस्कृतस्वाध्याय पठनकौशलाय च पत्रिकेयं साधनभूतैवास्ति।

सुमनसां प्रतिभाप्रतिभासिका
क्षितितलात्तमसश्च विनाशिका।
शिशुकिशोरयुवप्रियसाधिका
विजयते भुवि संस्कृत-चन्द्रिका॥

निवेदकः
डॉ. जीतरामभट्टः
सचिवः

राष्ट्रम्

– डॉ० क्षेमचन्दः

राष्ट्रं हि लोके मम भाति श्रेष्ठम्।
स्वस्थञ्च ग्रामैर्भरितं समृद्धैः।।
वासो यथा स्वच्छगृहे च स्वस्थः।
स्वस्थे च राष्ट्रे हि तथा निवासः।।१।।

राष्ट्रस्य वीरा निजदेशभक्ताः।
यत्नेन कुर्वन्ति स्वदेश-रक्षाम्।।
तेषां च यत्नेन वयं स्वतन्त्राः।
स्वस्थे च राष्ट्रे निवसन्ति स्वस्थाः।।२।।

नद्यश्च राष्ट्रे यदि तोयदास्ताः।
अन्नेन पूर्णं भवतीति राष्ट्रम्।।
कश्चित्क्षुधार्तो न भवेच्च देशे।
सर्वत्र भूयाच्च शुभं हि राष्ट्रे ।।३।।

सर्वे सुसिक्तास्तरवो जलेन।
दाता फलानां च भवन्ति देशे।।
गावो हि मे कामदुघा च राष्ट्रे।
दुग्धेन यासां बलिनः सुपुत्राः।।4।।

त्यागस्य राष्ट्रस्य कृते जनानाम्।
भवेच्च भावो हृदयेषु नित्यम्।।
तेनैव भावेन वयं हि योग्याः।
कर्तुं च रक्षां निजमातृभूमेः।।5।।

राष्ट्रं जनानां खलु मातृभूमिः
रन्नेन यस्या बलिनो भवामः।।
पूज्या च मातेव नित्यं हि लोकै-
स्तस्याः सुरक्षा ननु नो हि रक्षा।।6।।

जनाश्च देशे मम देशभक्ताः।
त्यागाय राष्ट्रस्य हिताय युक्ताः।।
कृत्वा च रक्षां निजमातृभूमे-
र्भूत्वा बलिष्ठा लभन्ते प्रतिष्ठाम्।।7।।

रागो न राष्ट्रं प्रति यस्य चित्ते।
न येन राष्ट्रस्य कृता हि सेवा।।
त्यक्तो न राष्ट्रस्य हिताय स्वार्थम्।
वासो न युक्तं खलु तस्य देशे।।8।।

डी.एस.२५२/३ क, गली नं. ७
भोलानाथ नगरम्, शाहदरा
देहली-११००३२

बुद्धिमान् गोपालः

– डॉ० हर्षदेवमाधवः

रामपुरं नाम एकः ग्रामः सौराष्ट्रदेशे अस्ति। तत्र करशनः नाम कुम्भकारः प्रतिवसति स्म। करशनस्य मूलनाम कृष्णः आसीत्, किन्तु ग्रामजनाः तं करशनं कथयन्ति स्म। करशनस्य एकः सखा आसीत्। तस्य नाम गोपालः। गोपालः न मनुष्यः किन्तु तस्य गर्दभः आसीत्। किन्तु करशनः तं मित्रं, बन्धुम् अमन्यत। जनाः सामान्यतः कथयन्ति यत् गर्दभेषु बुद्धिः न भवति। किन्तु तत् सत्यं नास्ति। सर्वे प्राणिनः बुद्धियुक्ताः सन्ति। किन्तु गोपालः सत्यम् एव बुद्धिमान् आसीत्। करशनः तं प्रतिदिनम् अस्नापयत्। यदा करशनः देवमन्दिरम् अगच्छत् तदा गोपालः अपि अगच्छत् । सः करशनेन सह देवं प्रणमत्। यदा करशनः अखादत् तदा गोपालः अपि अखादत्। यदा करशनः अस्वपत् तदा गोपालः रक्षकः भूत्वा द्वारात् बहिः रात्रौ करशनस्य गृहस्य रक्षाम् अकरोत्।

एकदा चोराः आगच्छन्। तदा गोपालः तान् पृष्ठपादेन अताडयत्। चोराणाम् अस्थिभङ्गः अभवत्। अतः ते गन्तुं न शक्ताः अभवत्। रक्षकाः चोरान् अगृह्णन्। ग्रामिणाः करशनस्य सम्मानम् अकुर्वन्। किन्तु करशनः अवदत्, 'हे बन्धवः! अयं पराक्रमः मम नास्ति। अयं पराक्रमः गोपालस्य अस्ति।' अतः ग्रामजनाः गोपालस्य गले पुष्पमालाम् आरोपयन्। अपि च गोपालस्य मस्तके तिलकं कृत्वा समग्रग्रामे अभ्रामयन्। जनाः अजानन् यत् गोपालः करशनस्य अतिप्रियः आसीत्। अतः सर्वे जनाः गोपालस्य कदापि अपमानं न अकुर्वन्। एकदा करशनः मृत्तिकाम् आनेतुं गोपालेन सह अगच्छत्। मार्गे करशनः अवदत्, 'भ्रातः गोपाल! क्षमस्व। तव पृष्ठे मृत्तिकारभारः मह्यं न रोचते किन्तु अहं मृत्तिकाम् आनेतुं न शक्तः। त्वं जानासि यत् मृत्तिकया अहं पात्राणि सृजामि। तानि विक्रीणामि। अतः धनं प्राप्नोमि। तव च मम च भोजनव्यवस्थां करोमि।' गोपालः सर्वम् अपि अशृणोत्। सः मस्तकम् अनामयत् अपि च करशनस्य विवशताम् अवागच्छत्।

करशनः ग्रामाद् बहिः एकस्मिन् स्थाने अतिष्ठत्। सः मृत्तिकाम् अखनत्। करशनः श्रान्तः। अतः कतिपय क्षणान् यावत् विश्रामम् अकरोत्। सः शनैः शनैः मृत्तिकया स्यूतम् अपूरयत्। करशनः अवदत्, ' भ्रातः गोपाल! यदि त्वं श्रान्तः तदा

अहम् अत्र तिष्ठामि। किन्तु गोपालस्य चलितुम् इच्छा नासीत्। गोपालः पादैः ताम् एव भूमिम् अलिखत्। अपि च तत्र एव भूमिम् अखनत्। सः तत्र पादान् आस्फालयन् गोपालः करशनं तत्र एव अधिकं खनितुम् असूचयत्। करशनः गोपालस्य सूचनम् अवागच्छत्। सः पुनः अपि तत्र एव अखनत्। यदा करशनः एकहस्तं यावत् नीचैः अखनत् तदा सहसा कुद्दालेन धातुशब्दः अभवत्। करशनः शनैः शनैः मृत्तिकाम् अपानयत्। करशनः पित्तलकलशान् अपश्यत्। तत्र चत्त्वारः कलशाः आसन्। ते सर्वे सुवर्णमुद्राभिः पूर्णाः आसन्। करशनः तान् कलशान् अपश्यत्। सः अवदत्, ' भ्रातः गोपालः त्वं नूनं मम पूर्वजन्मनः भ्राता असि। तव कृपया अहं धनं प्राप्तवान्।' इति उक्त्वा करशनः गोपालं पर्यष्वजत्। गोपालः अपि अनृत्यत्। तौ द्वौ सार्धं नृत्यम् अकुरुताम् करशनः गृहम् अगच्छत्। तस्य पत्नी अपृच्छत अद्य कस्मात् विलम्बः जातः? अपि भवान् कुशली ? अपि आवयोः गोपालः स्वस्थः ? करशनः अवदत् ''आम'' आवां स्वस्थौ कुशलिनौ। देवः महती कृपां कृतवान्। सः सर्वं वृतान्तं पत्न्यै न्येवदयत् । तदा करशनस्य पत्नी अवदत् अहं अधिकं धनं न इच्छामि। वयं श्रमं कृत्वा सुखम् अनुभवामः। करशनः अवदत् ''साधु साधु'' त्वम् असि सुशीला नारी असि। करशनः अर्धं धनं ग्रामस्य विकासाय प्रायच्छत्।

-८, राजतिलक बंगलो न. अबादनगरम्
भोपाल अहमदाबादः ३८००५८

घटिके घटिके टिक् टिक् घटिके

-डॉ० वेणीमाधव शास्त्री जोशी

घटिके घटिके टिक् टिक् घटिके
बोधय समयं टिक् टिक् घटिके।
धावसि धावसि सततं घटिके
धावसि लघु लघु टिक् टिक् घटिके।।१।।

दिवसे दिवसे सततं यासि
रात्रावपि नो विरमसि, यासि।
भित्तौ विहरसि गेहे गेहे
हस्ते विलससि देहे देहे।।२।।

त्यजसि सुवृत्तं न कदापि त्वं
त्यजसि च मार्गं न कदापि त्वम्।
चलसि च मार्गे घटिके वृत्ते
चलसि सकाले पथि सद्वृत्ते।।३।।

विश्रामं वा स्मरसि न नूनं
शान्तिं नो वा गणयसि नूनं
कर्तव्यस्य च वदसि सुनीतिं
सद्वृत्तस्य च कथयसि रीतिम्।।४।।

मन्दं मन्दं गच्छति कालः
गतः नैवागच्छति कालः
सततं याति न तिष्ठति कालः
तत्वमिदं ते.वदति च कालः।।५।।

- भामती वेन्द्रे मार्ग, साधानकेरी
धारवाड़- ५८०००८
(कर्नाटकः)

पुच्छमैत्री

- म.वि. कोल्हटकरः

अस्ति कश्चित् ग्रामः। अस्मिन् ग्रामे आस्तां द्वौ मार्जारौ। द्वौ वर्णेन शुभ्रौ। आसीत्। तयोः एकं वैशिष्ट्यम् तौ सर्वदा समेतम् एव समचरताम्। उत्थानं समेतम्। पतनं समेतम्। स्वापः समेतः। खेलनं समेतम्। ग्रामस्थानां कृते अयम् आश्चर्यविषयः।

न केवलं समेतता तयोः वैशिष्ट्यम्। तौ स्वीये पुच्छे परस्परं गुम्फित्वा एव संचरतः। कठिनं खलु एतावत् गमनागमनं संचारः च। तथापि तौ सहजतया एवम् अवर्तेताम्।

कैश्चिद् उपद्रवशीलैः नटजनैः तयोः मित्रतायाः समाप्त्यै प्रयासः कृत। एकः मार्जारः बद्धः। द्वितीयः बलात् दूरं नीतः। तदा किम् अभवत्?

तदा एकः मार्जारः नेत्रे निमील्य शरीरं मुष्टिकाकारं कृत्वा स्थिरं स्थितः। एवम् आसनं संस्थाप्य तेन मुखेन म्याँव म्याँव इति घोषः प्रारब्धः। दूरं नीतः मार्जारः अपि तादृशं घोषम् अविरल चालितवान्। एवं तेषां दीर्घकालं यावत् वियुक्तीकरणम् अशक्यप्राय सञ्जातम्।

ग्रामे तस्मिन् मार्जारयोः सहनाववतु सहनौ भुनक्तु' अहो आश्चर्यं' विषयः समभवत्। नवागताः तयोः दर्शनं कृत्वा कृतकृत्यताम् अन्वभवन्।

एकदा अस्मिन् ग्रामे शासनेन नियुक्तः एकः युवा पशुवैद्यः आगतः। पश्वारोग्यसर्वेक्षणम् आसीत् तस्य आगमन हेतुः। एषः सज्जनः सुविद्यः, चतुरः प्रयोगकुशलः च आसीत्।

अनेन युवावैद्येन एतत् मार्जारयुगलं दृष्टम्। वैद्यः चकितः जातः। सः व्यममृशत् एनं विषयम् अधिकृत्य सर्वोत्तमं चितनं करणीयं सूक्ष्मा परीक्षा करणीया।

वैद्येन विविधैः उपायैः चिकित्सा कृता। तेन आनीता आसीत् चलप्रयोगशाला (मोबाईल लैब् युनिट्)। वैद्यराजेन तयोः मार्जारयोः विलगरूपेण आपादमस्तकं सूक्ष्मपरीक्षा पारिता। परीक्षायाः अनन्तरः वैद्यराजः एकं विलक्षणं सत्यं प्राप्तवान्। चिकित्सोत्तरं सः अपश्यत् यत् तस्मिन् मित्रयुगले एकः मार्जारः पूर्णरूपेण दृष्टिहीनः अन्धः आसीत्। द्वितीयः मार्जारः दृष्टिसहितः आसीत्। अयं द्वितीय मार्जारः कारुण्यभावेन दृष्टिहीनं वयस्यं प्रतिपदं नीतवान्। अन्नपदार्थमपि दत्तवान्।

अहो मित्रता! अहो करुणाभावः मार्जारयोनिमध्ये अपि। मानवेभ्यः अपि बोधकारकम् एतत् उदाहरणम्।

– १६, जीवनछाया, कॉलोनी,
सिविल हॉस्पि. समोरः,
सातारा ४१५००१
(महाराष्ट्रः)

अहो मातृभूमिरहो जन्मभूमे

– मेवाराम कटारा 'पङ्कः'

नमोऽस्तु तुभ्यं नमोऽस्तु मातः।
अहो मातृभूमिरहो जन्मभूर्मे।।

त्वमेवासि बोधं जगत्यै विधात्री,
त्वमेवास्य विश्वस्य भाग्यस्य धात्री।
त्वमेवासि पूज्यापि सर्वैः सदा हे,
नमो मातृभूम्यै जगतो जनन्यै।। नमोऽस्तु.....।।१।।

पुनात्येव गङ्गाजलं भारतीयान्,
नगाधीश एष ददाति प्रभूतम्।
सुजातं च गर्भाद् वयं भक्षयामः,
जगन्मातृ-पादेषु सर्वे नमामः।।नमोऽस्तु.....।।२।

तवैवास्ति तोयं शिराणां प्रवाहे,
तवैवास्ति अङ्गेषु धान्यं सदा हे।
वयं धारयामः प्रभूतं ऋणं ते,
स्वप्राणप्रदानेन रक्षां विधेम।।नमोऽस्तु.....।।३।

अहो वन्दनीया अहो पूजनीया,
अहो माननीया अहो श्लाघनीया।
यतस्त्वत्प्रसूतस्त्वया पालितश्च,
सपर्यां हि मातः सदा ते करोमि।।नमोऽस्तु.....।।४।।

– ३६, जसवन्त नगरम्
भरतपुरः-३२१००१

दयावान् राक्षसः

- डॉ. हर्षदेवमाधवः

उज्जयिनी नाम एका विशाला नगरी अस्ति। प्राचीनकाले नगर्याः समीपे विशालं वनम् आसीत्। तत् वनं निबिडम् आसीत्। तस्मिन् वने विशालः वटवृक्षः आसीत्। वटवृक्षे बहवः कुलायाः आसन्। वृक्षस्य स्कन्धेषु कोटराणि आसन्। एकदा एकः राक्षसः तत्र आगच्छत्। सः राक्षसः तस्मिन् वृक्षस्य कोटरे निवासं कर्तुं व्यचारयत् । किन्तु तं दृष्ट्वा सर्वे विहगाः सम्मिलिताः। ते सर्वे उच्चैः आक्रोशन्, 'भोः भोः! किं तव नाम? त्वम् अत्र कस्मात् आगतः? वयं सर्वे निर्दोषाः विहगाः अत्र निवासं कुर्मः। अस्मान् मा पीडय। त्वं गच्छ अन्यत्र।'

राक्षसः अवदत्, 'हे मित्राणि! हे बान्धवाः! मा भयम् अनुभवत्। अहं युष्मान् न पीडयिष्यामि। मम नाम दयारामः अस्ति। ' सर्वे विहगाः अहसन्। ते अवदत्, 'किं किं तव नाम दयारामः अस्ति?

तदानीम् एकः शाकुनिकः वनं प्रावशित्। सः पक्षिणः पक्षिणां शावकान् हन्तुम् ऐच्छत्। सर्वे पक्षिणः आक्रन्दम् अकुर्वन्। दयारामः अवदत्, ' रे खगाः। मा चिन्तां कुरुत। अहं सर्वेषां रक्षणं करिष्यामि।' शाकुनिकः वृक्षम् आरुह्य विहगान् ग्रहीतुम् ऐच्छत्। सः वृक्षोपरि आरोहणं प्रारभत। तदा दयारामः शाकुनिकम् भीषयित्वा अद्रावयत् । एवं दयारामः पक्षिणां रक्षणाम् अकरोत्। सर्वे पक्षिणः दयारामस्य जयनादम् अकुर्वन्। दयारामः सर्वेषां प्रियः अभवत्।

एकस्मिन् आषाढे जलदाः न अवर्षन्। सरोवराः शुष्काः अभवन्। नदीषु जलं न आसीत् । वृक्षाः फलरहिताः पर्णविहीनाः अभवन्। पक्षिणः जलं विना, अन्नं विना दुःखिताः अभवन्। दयारामः अपि दुःखितः अभवत्। सः गगने उड्डयत। दयारामः दूर देशं नभसि अगच्छत्। सः तत्र श्यामान् मेघान् अपश्यत्। दयारामः अवदत्, 'हे जलदाः! मया सह आगच्छत। मम देशे जलं नास्ति। सर्वे प्राणिनः म्रियन्ते। दयां कुरुत।'

जलदाः अवदन्, 'भ्रातः वयं दयां करिष्यामः, किन्तु वयं पवनं विना कुत्र अपि गन्तुं न प्रभवामः। पवनः अस्मान् सर्वत्र नयति। यदि त्वं पवनं विना नेतुं शक्तिमान् असि तर्हि वयम् आगमिष्यामः।' राक्षसः विराटं स्वरूपम् अधारयत्। सः मेघान् स्कन्धम् आरोप्य स्ववनं अनयत्। जलदाः वने वृष्टिम् अकुर्वन्। सरोवराः जलेन पूर्णाः अभवन्। नद्यः निर्झराः जलेन पूर्णाः अभवन्। सर्वे प्राणिनः सानन्दम् अनृत्यन्। सर्वे प्राणिनः दयारामम् अपूजयन्। वनं पुनरपि हरितम् अभवत्।

-८, राजतिलक बंगलो न. अबादनगरम्
भोपाल अहमदाबादः ३८००५८

पञ्चवटी

-डॉ० रामकिशोरमिश्रः

पञ्चानां वटानां समाहारः पञ्चवटी स्मृता।
अगस्त्यसत्कारात्पश्चाद् रामः पञ्चवटीं गतः।।१।।

तत्र रामस्याऽनुमत्या लक्ष्मणः कृतवान् कुटीम्।
रामः ससीतः स्नाति स्म गोदावर्यां च साऽनुजः।।२।।

लक्ष्मण आनयति स्म कन्दमूलफलानि च।
सर्वे तानि खादन्ति स्म पिबन्ति स्म नदीजलम्।।३।।

एकदा शूर्पणखा सा तत्राऽऽजगाम राक्षसी।
श्रीरामं कामयमाना तं परिणेतुमब्रवीत्।।४।।

ततः स परिहासाय लक्ष्मणं तामदर्शयत्।
अयं विरहितः पत्न्या त्वमेनं हि परिणयेः।।५।।

स्वीकर्तुं तां हि सौमित्रिं प्रोक्तवती हि सादरम्।
स चोवाच तद्दासोऽहं दासपत्नी भविष्यसि।।६।।

- २९५/२४ पट्टीरामपुरम्
पो. ओ. खेकड़ा-२५०१०१
जनपदम्-बागपत (उत्तर प्रदेशः)

किमपि विसृष्टम्

— म.वि.कोल्हटकरः

अस्ति एकं महानगरम्। तस्मिन् विद्यते एकम् अत्युत्तमम् उपाहारगृहम्। उपाहारगृहे जनानां सम्मर्दः। सर्वे खानपानादौ व्यस्ताः।

उपाहारगृहं प्रविशति एकः युवकः। युवकेन सह वर्तते तस्य वयोवृद्धा माता। द्वौ एकं कोणं गच्छतः। आसन्दे उपविशतः।

युवकः द्वाभ्यां कृते स्थालीद्वयं भोजनं आदिशति। शाकः व्यंजनादिभिः युक्ते स्थाल्यौ आगच्छतः। भोजनं प्रारभते।

माता अतीव वृद्धा। उपस्थिताः अन्ये जनाः तयोः द्वयोः कृतिं ईक्षन्ते-कुतूहलेन।

माता विकलांगा वृद्धा। तस्याः हस्ते किंचित् कंपः। द्रव-पदार्थानां कणाः तस्याः शाटिकायां पतन्ति कपोले अपि केचन स्निग्ध-तैल-बिंदवः खाद्यवस्तूनां विविध-वर्ण-कणाः च पतन्ति।

पुत्रः तां खादयति। चमसया ग्रासमपि क्वचित् तस्याः मुखे स्थापयति। पुत्रः श्रद्धया एतत् सर्वं करोति।

अत्रान्तरे कासः प्रादुर्भवति वृद्धाया उपनेत्रं च पतति। पुत्रः शान्तमनसा उपनेत्रम् उत्थापयति, तस्याः नासिकायां स्थापयति।

अत्र तत्र अन्नकणाः विकीर्णाः। परितः विद्यमानाः खाद्यमग्नाः ग्राहकाः जुगुप्सया कदाचित्, क्रोधेन एतत् दृश्यं पश्यन्ति।

द्वयोः भोजनं समाप्नोति। पुत्रः मातरं हस्तेन गृहीत्वा। स्वच्छता-केन्द्रं नयति। मातुः परिवेषे कणान् कलंकान् सः शान्ततया क्षालयति। तस्याः परिवेषं सम्यक् सुचारु करोति। तस्याः उपनेत्रं क्षालयित्वा तस्याः नासिकायाम् आरोपयति। कपोलौ करवस्त्रेण शुष्कौ करोति। केशान् कंकेन सामान्यान् करोति। तस्या शाटिकां सुविहितां कर्तुं साहाय्यं करोति।

एवं भोजनं सामाप्य सः युवकः मात्रा सह शनैः व्यवस्थापीठं (काडण्टर) गच्छति।

ततः द्वौ वहिः गन्तुम् उद्यतौ। एतस्मिन् क्षणे अट्टे विद्यमानः एकः गृहस्थः उत्तिष्ठति। धावन् सः युवकं गच्छति। युवकं प्राप्य सः गृहस्थः वदति, ''रे मित्र, द्वौ द्वयं तव अत्र विसृष्टम्।

''किं तत्?'' युवकः पृच्छति।

गृहस्थः वदति, ''अत्रैव स्थितानां पुत्राणां कृते एकः आदर्शः वस्तुपाठः। तथा अत्रोपस्थितानां वृद्धानां कृते एकः आशापाठः।''

- १६, जीवनछाया, कॉलोनी,
सिविल हॉस्पि. समोरः,
सातारा ४१५००१
(महाराष्ट्रः)

श्रीराधामाधवलीलास्तोत्रम्

- डॉ० कैलाश नाथ द्विवेदी

कलिन्दजा-कूल-कदम्बरंजिता,
विलोकिता केन त्रिभंगिकाछविः
अहो सुभाजो व्रजवासिनो नराः
सदाऽपिबन्नेत्रशतैः पिपासितैः।।१।।

सुरारिकंसस्य निबन्धनात् पिता,
सपुत्रको नन्दनिकेतनं ययौ।
कलिन्दजा-नीर-तरंग-चुम्बितौ,
व्रजेशपादौ शिरसा नमाम्यहम्।।२।।

क्वचिद् यशोदाजिरतल्पशयिनौ,
क्वचित्सुहृद्गोपगृहेषु गामिनौ।
क्वचिच्च कालीदहसर्पमर्दिनौ,
व्रजेशपादौ शिरसा नमाम्यहम्।।३।।

करीर कुञ्जेषु विहारशालिनौ,
व्रजाङ्गनाभिः सह रासकेलिषु।
राधावशौ प्रेमवशादचंचलौ,
व्रजेशपादौ शिरसा नमाम्यहम्।।४।।

सदा सुहृद्भिः सह धेनुचारणे,
विहारशीलौ वनवीथिकासु यौ।
गृहे जनन्या कृतशून्यकण्टकौ,
व्रजेशपादौ शिरसा नमाम्यहम्।।५।।

क्व नन्दपुत्रो मृदुबालको नवः,
क्वं कंसचाणूररिपू मदान्वितौ।
वधाय यौ मल्लगृहेऽभिनन्दितौ,
व्रजेशपादौ शिरसा नमाम्यहम्।।६।।

क्व कौरवेशो धनगर्वितो नृपः,
क्व तस्य दासो विदुरो नयान्वितः।
तिरस्कृतव्यंजनयुन्निकेतनौ,
व्रजेशपादौ शिरसा नमाम्यहम्।। ७।।

क्व हस्तिनापूः क्व च द्वारिकापुरी,
विवस्त्रिता क्रन्दनकातरा सती।
तथापि श्रुत्वा गतिशीलतां गतौ,
व्रजेशपादौ शिरसा नमाम्यहम्।।८।।

प्रियार्जुनस्यन्दनमध्यशोभितौ,
प्रधावितौ भक्तपितामहं प्रति।
स्थिरौ न, भक्तस्य शुभाय कल्पितौ,
व्रजेशपादौ शिरसा नमाम्यहम्।।९।।

भक्तिभाववशीभूतौ, सुभक्तेभ्योऽभयप्रदौ।
राधावशीकृतौ प्रेम्णा, श्रीकृष्णचरणौ भजे।।१०।।
राधामाधवभक्तिं यः, श्रद्धयाश्रयते जनः।
सः कृष्णकृपया शीघ्रं भवसिन्धुं तरिष्यति।।११

- पूर्वप्राचार्यः,
कुसुमकुलायः, सूर्यनगरम्,
अजीतमल (औरेया)

श्रमः फलति सर्वत्र

- डॉ० क्षेमचन्दः

दौलतरामः आपणिको भाटकस्य आपणे चाय विक्रयं करोति। शाहदरास्थ गंगाविहारोपनगरे तस्य निवासो वर्तते। तस्य द्वौ पुत्रो स्तः। ज्येष्ठपुत्रो विश्वम्भरो विद्युत्परिषदि कार्यरतोऽस्ति। तस्य मासिक वेतनं त्रिसहस्रमुद्रात्मकमस्ति। द्वितीयो वेदप्रकाशः विद्याध्ययने श्रमं कृत्वा वरिष्ठ-माध्यमिक-परीक्षा पञ्च सप्तति प्रतिशतं अङ्कान् प्राप्य उदतरत्।

वेद प्रकाशः स्वपितरम् अपृच्छत् ''पितः मया वाणिज्य वर्गे वरिष्ठ माध्यमिक परीक्षा प्रथम श्रेण्यामुत्तीर्णा। अतएव अहं चार्टर्ड गणकस्य परीक्षायां स्वकीय नाम-लेखनं वाञ्छामि। दौलतरामः अकथयत् ''किं त्वं भविष्यकालेऽपि अध्येतुं वाञ्छसि ? किं त्वं न पश्यसि यत् वयम् उत्पन्नभोजिनः स्मः । न च परिवारस्य भरण-पोषणाय आपणे पर्याप्त आयो वर्तते। यथा विश्वम्भरः परिवार-पालने मे हस्तावलम्बनं ददाति तथैव वैतनिको भूत्वा त्वमपि मम साहाय्यं कुरु।

वेदप्रकाशः अवदत् '' उत्तम-सेवायाः कृते विशिष्ट शिक्षाया अभ्यासोऽपि वांछनीय भवति। अतएव गणक-विभागे सेवायै ''चार्टड एकाउन्टेट'' रूपेण प्रशिक्षणमत्यावश्यकम्। अस्याभावे च अल्पवेतन भोगी भूत्वा कृच्छ्रेण जीवनं यापयिष्यामि।

दौलतरामः अकथयत् ''सत्यमेवोक्तं त्वया। परमत्रविवशोऽस्मि। आपणे सर्व कालं यावदपि चोपविश्य न प्राप्नोमि परिवार-पोषणाय पर्याप्त धनम्। पितुर्वचनं श्रुत्वा वेद प्रकाशः अवदत् ''पितः परीक्षायै अहं व्यक्तिगतरूपेण आवेदनं करिष्यामि। भवतः किमपि शुल्कं न ग्रहीष्यामि केवलं पुस्तकानां कृते धनमेव ग्रहीष्यामि। श्रमस्तु मे भविष्यति एतच्छ्रुत्वा दौलतराम अवदत् ''यद्येवमस्ति तर्हि शोभनमेव भविष्यति। पुत्रः! आवेदनं कुरु। पुस्तकानां कृते धनस्य रक्षणं भविष्यति।

पितुराज्ञया प्रसन्नो भूत्वा वेदप्रकाशः प्रवेशं लब्धवान् श्रमेण चाध्ययने प्रवृत्तोऽभवत्। स अहर्निशं श्रमं कृत्वा प्राथमिकवर्गस्य परीक्षां पञ्चसप्ततिप्रतिशतं अङ्कान् लब्ध्वा उदतरत्।

दौलतरामः पुत्रस्य साफल्यं ज्ञात्वा अतीव प्रसन्नोऽभवत्। स सर्वकालं विक्रयं कृत्वा पुत्रस्य शिक्षार्थं धनार्जने दत्तचित्तोऽभवत्। इत्थं कतिपयमासान् यावत्कालो गतो यथा तथम्। परन्तु कालस्तु विचित्र एव। अस्य गतिस्तु कुटिला भवति।

परिवर्तनशीलोऽयं कालो नित्यञ्च गच्छति।
फलं ददाति कर्मणां जनानां च शुभाशुभम्।।

कालस्य गत्यानुसारमेव दैवदुर्विपाकाद् दौलतरामो दुर्घटनाग्रस्तोऽभवत्। शल्य-चिकित्सोपरान्ते स भ्रमितुमपि योग्यो नासीत्। नासीच्चोपवेष्टुम् आपणे पूर्णकालं यावत्। तस्माल्लाभांशोऽपि न्यून एव जातः।

दौलतरामः वेदप्रकाशम् अपृच्छत् ''पुत्र! अल्पकालिकविक्रयेण परिवारस्य पोषणाय पर्याप्त आयो न प्राप्यते अत एव आपणे विक्रयार्थं त्वयोपवेष्टव्यः।''

पितुर्वचनं श्रुत्वा वेद प्रकाश अकथयत् ''बाढम् । अपराह्णे चतुर्वादने अहम् आपणमुपवेक्ष्यामि। षट्वादने च पुनः गृहम् आगत्य अध्ययनं करिष्यामि। इत्थं होराद्वयं कालो मम बाधितो भविष्यति।

पिता श्रुत्वा वदति ''पुत्र! जानामि, तवाध्ययनेऽयं होराद्वयोरेव प्रत्यूहो मे खेद करो वर्तते परमत्र अहं किं करोमि चिरकालिकोपिवेशनेन कटिभागे महती पीडा जायते।

आपणाद् गृहमागत्य वेदप्रकाशः अचिन्तयत्। पितुः पीडा तु निवारणीया। अद्य भ्रात्रा विश्वम्भरेण सह वार्तां करोमि। रात्रौ स विश्वम्भरं पृच्छति ''भ्रातः। भवान् जानात्येव यत् पितुः पीडाया हेतोः होराद्वयोरेवकालं यावत् आपणमुपविशामि अनेन ममाध्ययने विघ्नं जायते। किं त्वं सेवायाः किञ्चित्कालं रक्षित्वा आपणे उपवेष्टुं शक्नोषि ? विश्वम्भरः प्रत्युवाच ''त्वम् एतत् जानासि यदहं कार्यालयात्पंचवादनात्पूर्वं गृहमागन्तुं न शक्नोमि। कथं कालं रक्षित्वा आपणमुपवेष्टुं सक्षमो भविष्यामि। एतच्छ्रुत्वा वेदप्रकाश पृच्छति ''सेवायाः काल-परिवर्तनं कृत्वा किञ्चित्कालस्त्वया रक्षितव्यः। आम्! सुष्ठु भणितं त्वया इत्युवाच विश्वम्भरः अहं गृहस्थित एव आह्वानं श्रुत्वा विद्युत् समस्यानां निराकरणं कर्तुं शक्नोमि। इत्थं विश्वम्भरेण वेद प्रकाशस्य सम्यक् अध्ययनार्थं रक्षितो होराद्वयोरेव क्रालः।

वेदप्रकाशोऽपि अचिन्तयत् '' मम अध्ययनार्थं मम भ्राता विश्वम्भरः माता च यदा कदा आपणमुपविश्य कालं रक्षन्ति। अतो मयापि स्वाध्यायो यत्नेन कर्तव्यः। इति विचिन्त्य पठनेऽनवरतोऽभ्यासमकरोत् फलतो मध्यमवर्गस्य परीक्षा तेन सप्तमपंक्तितः

प्रतिशतं अङ्कान् लब्ध्वोत्तीर्णा। एतत्साफल्यं दृष्ट्वा प्रसन्नो वेदप्रकाशो मनोयोगेन दृढपरिश्रमं कृत्वा अन्तिम वर्गस्य परीक्षां प्रथम श्रेण्याश्चापि अधिकाङ्कान् प्राप्य उत्तीर्णवान्।

दौलतरामः पुत्रस्य साफल्यं दृष्टवा अति प्रसन्नोऽभवत्। सः पुत्रम् अकथयत् ''पुत्र। तव श्रमफलेन गर्वितोऽहमधुना। तव कठोर परिश्रमस्यैतन्मधुरं फलम्। अत एव तवोपरि पुत्राभिमानी जातोऽहम्। वेदप्रकाश अवदत्'' पितः! एतत्साफल्ये यावत् मम श्रमस्य फलं तावदेव भवदाशीर्वादस्य अस्ति। आशीर्वादेन प्राप्यते पुण्यलाभः। अयं पुण्यलाभो भवति साफल्यस्य मूलम्।

दौलतरामः अकथयत् '' इदानीं शिक्षितस्त्वं जीविकापालनं कर्तुं योग्योऽसि। अत एव त्वया काचिद् योग्या जीविका अन्वेषणीया। ततश्च सर्वं शुभमेव भविष्यति। वेदप्रकाशः प्रत्युवाच'' आम् पितः। परीक्षाफलात्पूवमेव मया सुप्रतिष्ठितायां रेमण्ड वस्त्र समित्यां सहाय-गणकस्य रिक्त-पदाय आवेदितम्। श्वः तत्पदाय साक्षात्कारः कनाटप्लेसस्थ-प्रेक्षास्थाने भविष्यति। दौलतरामः अवदत्-भद्रं कृतं पुत्रेण। प्रशस्या त एषा चातुरी। सफलो भवतु मम पुत्रस्यायं कामः।

अपरेद्युः वेदप्रकाशस्य साक्षात्कारोऽभवत्। तत्र समित्याः निदेशको वेदप्रकाशेन दत्तप्रश्नोत्तरैः तुष्टो भूत्वा वेदप्रकाशम् अकथयत् ''वृतोऽसि त्वम्। गृहाण स्वकीयं नियुक्तिपत्रम्। श्रीमन्, अनुग्रहीतोऽस्मि इत्युवाच वेदप्रकाशः।

गृहं प्रत्यागत्य वेद प्रकाशः पित्रे न्यवेदयत् ''पितः। समित्या निदेशकेन सहायगणकस्य पदाय वृतोऽस्मि। श्रुत्वा च दौलतरामः अति प्रसन्नोऽभवत्। सः अकथयत् ''प्रभुण श्रुता मम प्रार्थना। अत्र ते श्रम एव बलवत्तरः। तस्य चेदं मधुरं फलम्।

सम्प्रति दौलतरामस्य परिवारः सुखसम्पन्नोऽस्ति। परिवारस्य भरण-पोषणं सुष्ठुरूपेण चलति। सर्वेषां जीवन-कालः सुख शान्त्या गच्छति। न शिष्टा धनाभावस्यापि का चित्समया। वस्तुतः श्रमेण कृतं कर्म सदैव फलति-

श्रमेण क्रियते कर्म, कर्म लोके प्रतिष्ठितम्।
श्रमणैव च साफल्यं, भवतीति न संशयः।।

- डी.एस.२५२/३ क गली नं. ७
भोलानाथ नगरम्, शाहदरा देहली-११००३२

किं भाति मह्यम्?

-डॉ० कीर्तिबल्लभः शक्टा

गगने भाति पयोदः मह्यम्
अवनितले तरुपङ्क्तः।
भाति चन्द्रमा नक्षत्रैः सह
रात्रौ प्रतिदिनदीप्तिः।।१।।

कुहू-कुहू कोयलकृतगीतम्
आम्रविटपवनमध्ये।
बकहंसानां धवला पङ्क्तः
भाति सरोवरनीरे।।

शिशुवृन्दैः सह क्रीडालापः
मधुरभोजनं नित्यम्।
दुग्धं, मध्वाज्यादिसमेतं
भाति सर्वदा भव्यम्।।

कोमलकिसलयपुष्पादीनां
गन्धो भाति प्रवीणः।
मृदुमोदकमिष्ट्टान्नादीनां
भाति सेवनं दिव्यम्।।

-शारदा ज्योतिर्भवनम् पं० ताराकरः स्मृति
एम० ई० एस० कैम्प समीपम्,
सरस्वती विहारः, खर्ककार्की (चम्पावतः)
उत्तराखण्डम्- २६२५२३

जलरक्षा हि जीवनरक्षा

-डॉ० हेमचन्द्रबेलवालः 'हिमांशुः'

पेयं स्वच्छं जलं सर्वदा
रक्षणीयं जलं सर्वदा।
अस्माकं जीवनं जलं
जलरक्षा हि जीवनरक्षा।

यस्मिन् देशे जलं वर्तते,
तस्मिन् देशे सुखं वर्तते।
जलं विना नो भवति जीवनं
जलरक्षा हि जीवनरक्षा।।

करणीयं नो जलं दूषितं
पानीयं हि जलं निर्मलम्।
सर्वेषां तु जलं जीवनं
जलरक्षा हि जीवनरक्षा।।

जलेन वृक्षो विवर्धतेतरां
जलेन माता करोति पाकम्।
जनो जीवति जलेन सरितां
जलरक्षा हि जीवनरक्षा।।

वृथा जलं नो पातनीयं
नदीजलं नो दूषणीयम्।
जलं जीवनं सदा प्राणिनां
जलरक्षा हि जीवनरक्षा।।

- सहायकाध्यापकः संस्कृते
रा उ ता वि घसाडः
पो० विनायकम् (मुवानी)
जिला पिथौरागढ़ः, उत्तराखण्डम्

सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

''संस्कृत-चन्द्रिका''

नैतिक मूल्यों के साथ-साथ

सम्पूर्ण देश के बाल-साहित्यकारों तथा नवोदित प्रतिभाओं

की लेखनी की संयुक्त प्रस्तुति

''संस्कृत-चन्द्रिका''

(आई.एस.एस.एन.-२३४७-१५६५)

संस्कृत भाषा के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की बाल मासिक पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

मूल्य : - एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु.२५०/- मात्र

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

''संस्कृत-चन्द्रिका''

के स्थायी अध्येता बनें ।

आज ही अपना वार्षिक सदस्यता शुल्क नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट द्वारा सचिव, दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें । शुल्क मल्टी सिटी चैक द्वारा स्वीकार्य होगा।

पत्र व्यवहार का पता--

सचिव/सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार

प्लाट सं. ५, झण्डेवालान, करोलबाग, नई दिल्ली-११०००५

दूरभाष सं.-०११-२३६३५५९२, २३६८१८३५

RNI No.
DELSAN/2013/50379

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी के
स्वाामित्व द्वारा मै. एस.डी.एम. प्रिन्टर एण्ड पैकर,
हरिनगर, घण्टा घर, नई दिल्ली–64
से मुद्रित और दिल्ली संस्कृत अकादमी, प्लाट सं.–5,
झण्डेवालान, करोलबाग, नई दिल्ली–110005 से प्रकाशित।